CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

4-12-79

अथ नमक - चमकात्मको

रुद्राध्यायः

मेरुतन्त्रोक्तरुद्र-महारुद्रातिरुद्रविधिविधाननिर्णय-

पञ्चरुद्र - जपाभिषेक-हवनविधिसमेतश्च

निर्णयसागर प्रकाशन, मुंबई २

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ मेरुतन्त्रोक्तं सर्वसिद्धिप्रदं रुद्रजपादिसशान्तिकं विधानम् ॥

वृषाधिरूढं देवेशं सर्वलोकैककारणम् ।
ध्यायेद् ब्रह्मादिभिः स्तुत्यं पार्वतीसहितं शिवम् ॥

अथ सर्वकामार्थः शौनकोक्तः प्रयोगः ॥

अस्य रुद्राध्यायस्य केवलं जपमात्रेण सर्वसिद्धिः ।
त्रिषवणस्नायी जपित्वा पञ्चमहापातकात् पूतो भवति ।

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३९८
बुलन्दशहर (उ०प्र०)

"अथापरं पूर्वोक्तविधिना मन्त्रन्यासादिकं कृत्वा, प्रस्थमात्रपरिमाणपरिमितान् कलशानक्षतगन्धपुष्पसहितोदकयुक्तान् कृत्वा, पूर्वोक्तविधिना देवमभ्यर्च्य देवपार्श्वे रुद्रप्रथमानुवाकमन्त्रैराज्याहुतीर्हुत्वा रुद्रैकादशिनीं जपेत् । जपान्ते 'अग्नाविष्णू–' इत्येकादशानामनुवाकानामेकैकं जपेत् । ततः पञ्चामृतैः स्नापयेत् । ततः पञ्चगव्येन । ततो 'नमस्ते–' इति प्रथमयोपचाराः । ततो यथाशक्ति रुद्रवेदिनो ब्राह्मणान् भोजयेत्, सर्वे कामाः संपद्यन्ते । अथवा रुद्र-महारुद्र-अतिरुद्रेष्वन्यतमं जस्वोक्तसंख्यया पायसं जुहुयात् । सर्वकामानवाप्नोति । अथवैवमेव यथासामर्थ्यं क्षीरेण घृतेन च स्नापयेत् । रुद्राध्यायेनाभिमन्त्र्य, 'मानस्तोके–' इत्यनेन घृतपायसेनायुतं जुहुयात् । अथ देशेऽन्तर्धीय कपटग्रहादिषु मध्य एष एव विधिरुच्चाटने । फट्कारेण सर्वकार्याणि समारभेत् । अथ राज्यकामस्य पद्मसौगन्धिकोत्पलानां 'प्रमुञ्च धन्वन–' इति मन्त्रेण भगवतो महेश्वरस्योभयचन्दनाक्तानां शतसहस्रं महेश्वरस्य शिरस्यारोपयेत् । राजा श्रियं विन्दति । 'नमो वः किरिकेभ्य–' इत्यनेन तिलतण्डुलानामाज्याक्तानां शतसहस्रं जुहुयात् । राज्यं प्राप्नोति" । अथान्यो बौधायनोक्तः–"रुद्रमहारुद्रातिरुद्राणामन्यतमं जस्वोक्तसंख्यया राष्ट्रकामो यवानाज्याक्तानयुतं जुहुयात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ श्रीकामस्य रुद्रमहारुद्राणामन्यतमं जप्त्वा पायसेनायुतं जुहुयात् । श्रियं लभते । वित्तकामस्य 'इमा रुद्राय-' इत्यनेन तिलैः शतसहस्रं जुहुयात्"। अथ कालिकापुराणे सनत्कुमारः—"आदावङ्गानि संयोज्य स्नात्वा देहे स्वके द्विजः। ततो वत्स महादेवं पूजयेद्विधिपूर्वकम् ॥ एकं लिङ्गं नदीतीरे ह्यपरास्यं जलैः स्नपेत् । पञ्चगव्येन भूयोऽपि शम्भुं पलशतेन च ॥ संस्नाप्य वारिणा भूयो ध्यात्वा तं जगदीश्वरम् ॥ (एकं लिङ्गं वृषभादिपरिवाररहितम् अपरास्यं पश्चिमाभिमुखम्) तद्गोरोचनया सार्धं लेपयेद्भक्तितो हरम् । श्रीवृक्षोत्थैस्ततः पत्रैर्निश्छिद्रैर्जन्तुवर्जितैः । नैव पर्युषितैः स्निग्धैः प्रोक्षितैरर्चयेच्छिवम् ॥ एकादश दिनान्ये-वमर्चयेत्तं महेश्वरम् । विधिनानेन देवेशं भूयस्तं वै निबोध मे ॥ दिनान्येकादशैवादौ पूजान्ते होममाचरेत् । साज्यैर्बिल्वदलैर्नित्यं दक्षिणां दिशमास्थितः ॥ एवं नीलोत्पलैर्भूयः पद्मैश्चैव सुगन्धिभिः । होममर्चां प्रकुर्वीत त्रिरेकादशवासरान् ॥ सघृतं गुग्गुलुं दग्ध्वा नित्यमेव हरप्रियम् । पूजान्ते परया भक्त्या तस्यैवं धनसंचयः ॥ वित्तकामो यदा सोऽथ स्यादालिङ्ग्य वनस्पतीन् । जपेद्रुद्रांश्छिवं ध्यायेत् ध्रुवं ते हेमतां ययुः ॥ सपुष्पं वा तरुं ब्राह्मं बिल्वं वालिङ्ग्य तान् जपेत् । आवर्तयन्बहून्वारान् स वृक्षो हेमतां व्रजेत् ॥ तीर्थे कनखले गत्वा जप्त्वा रुद्रान्बहून्पुनः । जपेन्मध्यजले कृष्णपाषाणा हेमतामियुः ॥ महापर्वतमाश्रित्य अवष्टभ्य दिने दिने । जपेदेकादशाहान्ते निधिं प्राप्नोति पुष्कलम् ॥ समिधो वैतसीश्चैतत् त्रिमध्वक्ता जुहोति यः । तदन्ते जायते तस्य द्रविणं पुष्कलं बहु । मधुबिल्वादयो वृक्षा आलिङ्ग्यैकादशे दिने । जपान्ते हेमतां यान्ति तथ्यं तत्र न संशयः ॥ अथवा लिङ्गमाश्रित्य स्वयम्भ्वपरदिङ्मुखम् । संछाद्यैकादशाहानि जपेदेतत्सुपङ्कजैः ॥ पशून्वा कुत्सितांश्चैव न पश्येन्न च संस्पृशेत् । यं पश्येद्व्यपयाते तु हेम स्यात् द्वादशेऽहनि" ॥ अथान्यः— "कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशी । स्थण्डिलं चोपलिप्यार्कप्रस्तरे वा जपेत्सुधीः । 'नमो अस्तु नीलग्रीवाय—' इत्यनेन सहस्राभिमन्त्रितं घृतपायसमीश्वराय निवेदयेत् । कार्षापणानां सहस्रमुत्पद्यते । अथान्यः—'प्रमुञ्च धन्वन—' इत्यनेन यथासिद्धानां महानसेऽन्नावयसहस्रं जुहुयात् । द्रव्यमव्यवच्छिन्नमक्षयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति । अथान्यः—'नमो वः किरिकेभ्य—' इति तिलाहुतीनामयुतं जुहुयात् । कार्षापणानां सहस्रमुत्पद्यते" इति कालिकापुराणे । अथान्नकामस्य शौनकः—'असौ यस्ताम्र—' इत्यनेनोभयेनाहरहरुदयास्तमययोरादित्यमुपतिष्ठेताक्षयमन्नमुपतिष्ठते । अथ बौधायनः—"उदुम्बरसमिद्भिर्मधुक्षतैर्वा रुद्रमहारुद्रातिरुद्राणामन्यतमं जप्त्वा तंत्रोक्तसंख्यया जुहुयादन्नमुत्पद्यते" । अथ वृष्टिकामस्य शौनकः—'असौ यस्ताम्र—' इत्यनेनोदकशाकयवाहारो वेतससमिधामयुतं जुहुयात्, गुडक्षीराक्तानां वाऽयुतं जुहुयात् । भगवानादित्यो वृष्टिं मुञ्चति । अथायुष्कामस्य स एवाह—"आयुष्कामः पूर्वोक्तविधिना देवमाराध्य सर्वदिक्षु रक्तपीतकृष्णबलीन्दत्वा रुद्रैकादशिनीमेकादशकृत्वो जप्त्वा 'आरात्ते गोघ्न—' इति षोडशोपचारान्कृत्वा तमेव मन्त्रं सहस्रं जपेत् । व्याधितश्चेद्रवेर्दिने ब्राह्मणाय दक्षिणां दत्वा सहस्रं जापयेत् । व्याधिभ्यः प्रमुच्यते शतायुर्भवति । अथ पुत्रकामस्य शौनकः—'परिणो रुद्रस्य—' इति वटसमिधामयुतं जुहुयात्, पुत्र आयुष्मानुत्पद्यते । अथ गोकामस्य स एव—'नमो वः किरिकेभ्य—' इति मन्त्रेण वैकङ्कतोदुम्बरसमिधां दध्यक्तानामयुतं जुहुयात् । अनन्तगोस्वामी भवति, न च गावः प्रक्षीयन्ते । अथवानेनैव मन्त्रेणार्कपर्णशतं गोपयसैकादशाहुतीर्जुहुयादेकादश गाव उत्पद्यन्ते । अथ वाक्कामस्य स एवाह—महाचतुष्पथे वल्मीकमृदा लिङ्गं प्रतिष्ठाप्य पञ्चगव्येन स्नापयेत् । 'नमो वः किरिकेभ्य—' इत्यनया चाभिमंत्र्य 'मानस्तोक—' इति घृतपायसं दिनद्वयं बिल्वमुपहरेत् । दक्षिणामूर्तौ वचाफलसमर्धफलं सुसूक्ष्मं चूर्णं कृत्वा ताम्रभाजने न्यसेत् । कपिलाघृतेनालोड्य प्रदेशिन्या नियुताभिमन्त्रितं कृत्वा पिबेदप्रतिहतवाक्यो भवति" । पुनः स एव—"—'द्रापे अन्धसस्पत—' इत्यादिना शतसहस्रं जुहुयात् । वासांस्यक्षराणि भवन्ति" । अथ वश्यकामस्य बौधायनः—"रुद्रैकादशिनीरुद्रमहारुद्रातिरुद्रेष्वन्यतमं जप्त्वा, 'जुहुयात् श्वेतपुष्पाणि स विश्वं कुरुते वशम् । अथ कृत्स्नं जगत्कश्चिद्वशीकर्तुं समीहते । नाभिमात्रजलस्थश्च जपेद्रुद्रान्बहूंस्तथा ॥ कृत्वा चैवार्चनं शम्भोरादाय नियमं ततः । आदित्याभिमुखो भूत्वा रुद्रानावर्तयेत्सदा ॥ तस्यावर्तयतो रुद्रान् जिताक्षस्य च धीमतः । वृषकेतुः समायाति वरदो भक्तवत्सलः ॥'—"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथारोग्यकामस्य शौनकः–'मानोमहान्तं–' इति मन्त्रेण तिलाहुतीनामयुतं जुहुयात् । बालानां परिजनस्यारोग्यं भवति" । अथ प्रत्युपस्थिते सर्वभये क्लेशविमोक्षकामः पूर्वोक्तविधिना मन्त्रदेवन्यासादिकं कृत्वा बलींश्च दत्त्वा 'मीढुष्टम–' इति पुनः षोडशोपचारं कृत्वा रुद्रैकादशिनीमेकादशकृत्वो जप्त्वा जापयित्वा वा रुद्रवेदिनं सर्वेभ्यो भयेभ्यः प्रमुच्यते नात्र संशयः । 'इमाᳪरुद्राय–' इति मन्त्रेण दधिमधुपायसाहुतीनां प्रत्येकमयुतं जुहुयात्, सर्वभयान्युपशाम्यन्ति । अथ शान्तिकामः पूर्वोक्तविधिना मन्त्रदेवन्यासादिकं कृत्वा देवमाराध्य रुद्रवेदिनं ब्राह्मणमाचार्यं कृत्वा स्वयम्भुलिङ्गमभिगम्य तत्राप्यनेनैव विधिनाराधनं कृत्वा पञ्चामृतैः स्नापयित्वा प्रथमानुवाकेनाज्यहोमं कृत्वा देवं संपूज्य, 'नमस्ते रुद्रमन्यव–' इत्येकादशानुवाकानां जपं कुर्यात् । धारामास्रावयंस्तथा जपान्ते 'अग्नाविष्णू सजोषस–' इत्येकादशानुवाकानामेकमेकं जपेत् । पुनः पञ्चामृतैः स्नापयेत् । ततो देवं समभ्यर्च्य, भक्ष्यभोज्ययुतं नैवेद्यं दत्त्वा, चतुरः पूर्णकलशान्पञ्चमृत्तिकापञ्चपल्लवपञ्चरत्नयुतानक्षतगन्धधूपादिभिरर्चयित्वा सितवस्त्रवेष्टितान् कृत्वा 'शं नो वातः पवताम्' इति शान्तिं ध्यायन् जप्त्वाऽभिषेकं कारयेत्, शान्तिर्भवति । ततः स्वस्थो भवति । आचार्याय सितवस्त्रयुगुलं धेनुं काञ्चनं च दद्यात्, ब्राह्मणांश्च भोजयेच्छान्तिर्भवति" । पुनः शौनकः–'मानोमहान्तम्–' इति मन्त्रेणाश्वत्थसमिधामयुतं जुहुयात् । प्रतिसंवत्सरं यात्रायामयुतं जुहुयात् । एवं कृते आत्मीयस्य बालस्त्रीवृद्धजातस्य शान्तिः । 'नमो भयाय–', 'नमो ज्येष्ठाय–' इत्येताभ्यां कुमारग्रहादिग्रस्तानां भस्माभिमन्त्र्य रक्षां कारयेत् । रात्रौ शिखां च बध्नीयात्, कुमारादिग्रहभयं न भवति । 'मीढुष्टमशिवतम–' इति महाभये चौरभयेऽग्निभये प्राणात्यये वा मनसा जपेत्, क्षेमेणागच्छति । 'इमाᳪरुद्राय–' इत्यनेन सुवर्णदूर्वाङ्कुरैः शतसहस्रं जुहुयात् । महाज्वरोपघाते गतायुरपि दीर्घायुर्भवति । 'नमस्ते रुद्रमन्यव–' इति चतुर्भिः प्रत्यृचं यवगोधूमगवीधुकजर्तिलानां दधिमधुघृताक्तानामयुतं जुहुयात् । एकादशद्वादशरात्रेण वा वायुमुपशमयति । 'अध्यवोचदधिवक्ता–' इति सर्वरक्षा कर्तव्या । आतुरेभ्यः सर्षपान्सप्ताभिमन्त्रितान् कृत्वा चतुर्दिशं प्रक्षिपेत्, दशदिक्षु रक्षा कृता भवति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पथि गच्छतोऽसच्छान्तिमुपगच्छति। सर्षपेण ब्रह्मराक्षसभूतपिशाचादिभ्यो मोक्षयति। 'या ते रुद्र शिवा तनू–' इति ऋग्याऽन्तिमा तया प्रतिसरं सहस्राभिमन्त्रितं कृत्वा एकादश ग्रन्थीन् दत्वा बालानां गुर्विणीनां च हस्ते बध्नीयात्। बाला गुर्विण्यश्च सुखेन वर्द्धन्ते। यक्षराक्षसाद्युत्सादनं च। 'सहस्राणि–' इति रक्तवाससा रक्तोष्णीषरक्तमाल्यानुलेपनैर्देवं समर्चयेत्। श्मशाने एकवृक्षे नदीपुलिने चतुष्पथे वने वा कार्पासतण्डुलपरिवेष्टितां महातैलाक्तां श्मशानाग्नौ प्रदीप्तेन यवपिष्टेनैकादशाभिमन्त्रितेन यक्षराक्षसादेः शत्रोरपि प्रतिकृतिं कृत्वोरसि कटुतैलेन प्रतिमां कृत्वा स्थाप्य दक्षिणभूमिभागे एकैकेन शरेणैकादशप्राणायतनेषु वितोदयेत्। सहस्रागतं सकललोकगतं वा शत्रुमुत्सादयति। 'नमो रुद्रेभ्य–' इति मध्याह्ने रुक्मकण्टकैर्जुहुयात्सर्षपैश्चाहरहर्वा प्रत्यापत्ती राष्ट्रे देवयोनयः सपिशाचाश्च भ्रंशन्ति खेचरीणां स्त्रीणां यातुधानानां वा भस्मीभवन्ति।

अथेमाः शान्तयः। 'इमाँ रुद्राय–' इति मन्त्रेण गवामुपघाते गोष्ठमध्येऽग्निमुपसमाधाय वैकङ्कतसमिधामयुतं जुहुयात्। गवां शान्तिर्भवति। यावन्तश्चतुष्पदास्तावद्भ्य एवमेव शान्तिविधिं कुर्यात्। "नमस्ते रुद्र मन्यवः–" इत्यनेन गवामुपघाते गोष्ठमध्येऽग्निमुपसमाधाय वैकङ्कतसमिधामयुतं जुहुयात्। पश्वादीनां शान्तिर्द्विगुणेन महाशान्तिरिति। अथ शत्रुमारणकामः पूर्वोक्तविधिना मन्त्रन्यासादि कृत्वा दिक्पालेभ्यो रक्तौदनबलीन् दत्वा 'स्तुहिश्रुतम्–' इत्यनेन षोडशोपचारान् कृत्वा रुद्रैकादशिनीमेकादशकृत्वो जपित्वा पुनः 'स्तुहिश्रुतम्–' इति सहस्रं जपेत्प्रत्यहं सप्तरात्रेण शत्रुविनाशो भवति। अथ कृत्यामुत्पादयितुकामः रक्तवाससा रक्तोष्णीषरक्तमाल्यानुलेपनैर्देवमर्चयेत्। श्मशानाङ्गणे लोहितशलाकाः प्रादेशमात्रा महातैलाक्ता लक्षं जुहुयात्। "उत्तिष्ठ रक्ताङ्गि रक्तनेत्रे रक्तकेशि" कन्यां तां क्षिप्रमेव रुधिरकुम्भेन पूर्णमांसमात्रेण तर्पयेत्। अन्यथा कर्तारमेव हिंसेत्। सा त्वरिता यन्त्रिता वदति—"कं धर्षयामि वद वा शाम्यते यदि त्रैलोक्यस्थितं अभ्युत्सादयिष्यामि" इति। यथा चैकैकस्य शरीरस्य ग्रामे नगरे गृहे च प्रयोगः। शाकं यशस्यमुपयोक्ष्यमुपोष्य द्वादश रात्राणि लघुभ्यो लघूनि महान्तीति समहीनानि तुलापुरुषचान्द्रायणानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मध्यम एव विकल्प्य ग्रहणे त्वाचम्य नित्याभिवाद्यावलम्बिनान्यथा पठेत् इति । 'प्रमुञ्च धन्वन–' इति वह्निरायुधमभिसन्ध्य संग्रामोपनीताः शत्रवः पलायन्ते । अभिमुखा नावतिष्ठन्ते । दर्भकण्टकानामयुतं जुहुयात् । प्रभूतः शत्रूयते क्षत्रियादिः । क्षत्रियो दिवसत्रिभागेन, वैश्यः षड्भागेन, चतुर्भागेन शूद्रः । तथा चान्याहतं कर्मेत्याचक्षते । 'विकिरिद विलोहित–' इति यथा शत्रुभिरनेकपर्यायसुप्तशत्रुमुखे जुहुयात् । सर्वे विभ्रममनसो विमुखाः शत्रवश्च पलायन्ते । 'नमो हिरण्यबाहव–' इत्यनुवाकैः कटुतैलाक्तानां राजाभिशङ्कितानां सर्षपान् जुहुयात् । चक्रमुत्सादयति । फट्कारेण देवस्योपरि मालामधोशिरामवलम्ब्य सशिरसा वस्त्रेण रुधिरमाप्लाव्य त्रिकटुकेनाभ्यज्य देवकराङ्गुलिना रेखामुत्पाद्य शत्रोर्नामानुस्मरन् जपेत् । सबलसमुदायं शत्रुमुच्चाटयति । एवं कृत्स्नं ग्राममुच्चाटयति एकाह्ना । राजानमहोरात्रेण संपूर्णमर्धदिवसेन क्षत्रियं क्षपयति । दिवसत्रिभागेन वैश्यं चतुर्भागेन शूद्रम् । तथा चान्याहतं कर्मेत्याचक्षते । एतत्सर्वं शौनकोक्तं हेमाद्रौ ॥

विधानफलश्रुतिः ।

अथ मेरुतन्त्रम्–"रौद्रीं धारां ततः कुर्यात्प्रोच्यते तद्विधानकम् । 'नमस्ते रुद्राग्नाविष्णू' इत्यध्याय-द्वयेन च । 'आवर्तनमिति प्रोक्तं गङ्गास्नानफलप्रदम् । आवर्तनाभिषेकं तु यः कुर्यात्प्रत्यहं नरः । तस्यैव दिनजं पापं दैवजं नाशमाप्नुयात् । संध्यावन्दनतः क्षीणं तच्चेत्प्राग्जन्मजं भवेत् । एकः पाठो नमस्तेऽस्य ह्यनुवाकः परस्य च । एवं भवाय 'नमस्ते'ऽस्य 'अग्नाविष्णू' तथैककम् । इयं रुद्री समाख्याता रौद्रपापनिकृन्तनी । अनया प्रत्यहं यस्तु कुर्याल्लिङ्गाभिषेचनम् । जन्मजन्मकृतं पापं वर्षमध्ये प्रणश्यति । रुद्रीभिरेकादशभिर्लघुरुद्रः प्रकीर्तितः । अनेन सिक्तं यैर्लिङ्गं ते न पश्यन्ति भास्करिम् । एकादशभिरेतैस्तु महारुद्रः प्रकीर्तितः । निर्धनो धनमाप्नोति महापातकनाशनः । अनेन विहितो होमः सोमयागफलप्रदः । अनधिकारी दीक्षायां करे पक्षस्त्वयं मतः । एकादशमहारुद्रैरतिरुद्रः प्रकीर्तितः । अतिपापहरो यस्मात् दृष्टाऽन्या नैव निष्कृतिः" ॥

इति मेरुतन्त्रोक्तं सशान्तिकं सर्वसिद्धिप्रदं विधानं समाप्तम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ रुद्रजपहोमार्चनविधिः ।

स्मेराननं चन्द्रकलावतंसं गङ्गाधरं शैलसुतासहायम् ।
त्रिलोचनं भस्मभुजङ्गभूषणं ध्यायेत् पशूनां पतिमीशितारम् ॥

अथातः पञ्चाङ्गरुद्राणां महान्यासपूर्वकं जपहोमार्चनविधिं व्याख्यास्यामः ॥ लिङ्गस्य दक्षिणतोऽग्निकुण्डं विधाय मथित्वाऽग्निं निधाय नित्यवदाज्येन दूर्वाभिः शुद्धतण्डुलशमीसमिद्भिः प्रत्येकमष्टसहस्रं जुहुयात् । देवस्य संनिधौ जपेदष्टसहस्रम् । देवालयमभितः प्रदक्षिणमष्टसहस्रम् । ताण्डवं देवस्य संनिधौ । एतैः कर्मभिर्भगवानतिप्रसन्नो भवति । पञ्चाङ्गरुद्रविधिर्नाम पञ्चविधा येऽङ्गन्यासास्तेषां विधिः । स चेत्थम्—शिखाद्यस्त्रान्तमेकत्रिंशदङ्गन्यासः प्रथमः । मूर्धादिपादान्तं दशाङ्गन्यासो द्वितीयः । पादादिमूर्धान्तं पञ्चाङ्गन्यासस्तृतीयः । गुह्यादिमस्तकान्तं पञ्चाङ्गन्यासश्चतुर्थः । हृदयाद्यस्त्रान्तं पञ्चाङ्गन्यासः पञ्चमः । तत्र प्रथमो न्यासः—'या ते रुद्र' इति शिखायाम् । 'अस्मिन् महत्यर्णव' इति शिरसि । 'सहस्राणि' इति ललाटे । 'हंसः शुचिषद्' इति भ्रुवोर्मध्ये । 'त्र्यम्बकं यजामहे' इति नेत्रयोः । 'नमः स्रुत्याय च' इति कर्णयोः । 'मा नस्तोके' इति नासिकायाम् । 'अवतत्य' इति मुखे । 'नीलग्रीवा द्वौ' इति कण्ठे । 'नमस्ते अस्त्वायुधाय' इति बाह्वोः । या ते हेतिः इति इत्युपबाह्वोः ।]ये तीर्थानि' इति हस्तयोः । 'सद्यो जातम्' इति पञ्चानुवाकान्पञ्चस्वङ्गुलीषु । 'नमो वः

पं० प्रेम [illegible] शास्त्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किरिकेभ्यः' इति हृदये । 'नमो गणेभ्यः' इति पृष्ठे । 'नमो हिरण्यबाहवे' इति पार्श्वयोः । 'विज्यं धनुः' इति जठरे । 'हिरण्यगर्भः' इति नाभौ । 'मीढुष्टम' इति कट्याम् । 'ये भूतानाम्' इति गुह्ये । 'ये अन्नेषु' इत्यण्डयोः । 'सशिरा जातवेदा' इत्यपाने । 'मानो महान्तम्' इत्यूर्वोः । 'एष ते रुद्र' इति जान्वोः । 'संसृष्टजित्' इति जङ्घयोः । 'विश्वं भूतम्' इति गुल्फयोः । 'ये पथाम्' इति पादयोः । 'अध्यवोचत्' इति कवचम् । 'नमो बिल्मिने' इत्युपकवचम् । 'नमो अस्तु नीलग्रीवाय' इति तृतीयनेत्रम् । 'प्रमुञ्च धन्वन' इत्यस्त्रम् । 'य एतावन्तश्च' इति दिग्बन्धः । अथात्मानं श्रीरुद्ररूपं ध्यायेत्--

"शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् । गङ्गाधरं दशभुजं सर्पाभरणभूषितम् ॥
नीलग्रीवं शशांकाभं नागयज्ञोपवीतिनम् । कमण्डल्वक्षसूत्राद्यैरन्वितं शूलपाणिनम् ॥
ज्वलन्तं पिंगलजटं शिखामुद्द्योतकारिणम् । अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम् ॥
दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् । दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ॥
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् । सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ॥" इति ॥

"चमकं नमकं होतृन् पुरुषसूक्तं जपेत् सदा ।
प्रविशेत् स महादेवं गृहं गृहपतिर्यथा ॥"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ रुद्राभिषेकविधिः ।

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः ॥ आदित एव तीर्थे स्नात्वोपेत्याहतं वासः परिधाय शुचिः प्रयतो ब्रह्मचारी शुक्लवासा ईशानस्य प्रतिकृतिं कृत्वा तस्य दक्षिणतः प्रत्यग्देशे तन्मुखः स्थित्वाऽऽत्मनि देवताः स्थापयेत् । प्रजनने ब्रह्मा तिष्ठतु । पादयोर्विष्णुस्तिष्ठतु । हृदये शिवस्तिष्ठतु । उदरे पृथिवी तिष्ठतु । जठरे अग्निस्तिष्ठतु । कण्ठे वसवस्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु । नासिकयोर्वायुस्तिष्ठतु । नयनयोश्चन्द्रादित्यौ तिष्ठेताम् । कर्णयोरश्विनौ तिष्ठेताम् । ललाटे रुद्रास्तिष्ठन्तु । पृष्ठे पिनाकी तिष्ठतु । पुरतः शूली तिष्ठतु । पार्श्वयोः शिवाशंकरौ तिष्ठेताम् । सर्वतो वायुस्तिष्ठतु । ततो बहिः सर्वतोऽग्निज्वालामालापरिवृतस्तिष्ठतु । सर्वेष्वङ्गेषु सर्वा देवतास्तिष्ठन्तु । मां रक्षन्तु । अग्निर्मे वाचि श्रित इति यथालिङ्गमङ्गानि अस्पृश्याऽऽत्मानं गन्धपुष्पधूपदीपनैवेद्यैर्मानसैराराधयेत् । अथैनं प्रसाधयेत्—'आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः । आराधयामि भक्त्या त्वां मां गृहाण महेश्वर' इति । त्र्यम्बकमिति च । एवमात्मपूजानन्तरं बाह्यपूजाप्रकारः—'आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिः । वाताजितैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्व' ॐमित्यावाहयति । स्थापिते तु नावाहनम् । अथासनं ददाति 'सद्योजातम्' इति । 'भवे' भव इति पाद्यम् । 'भवोद्भवाय नमः' इत्यर्घ्यम् । 'वामदेवाय नमः' इत्याचमनीयम् ।

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २ २३६४
बुलन्दशहर (उ० प्र०)
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथैनं स्नापयति 'आपो हिष्ठा'दिभिस्तिसृभिर्हिरण्यवर्णा इति चतसृभिः पवमानः सुवर्जन इत्यनुवाकेन मार्जयित्वा, सर्वो वै रुद्रः कया नश्चित्र आपो वा इद ५ सर्वमित्येतैश्च । 'वामदेवाय नमः' इति वस्त्रम् । 'ज्येष्ठाय नमः' इत्युपवीतम् । 'रुद्राय नमः' इत्याचमनीयम् । प्रणवेन भूषणम् । 'कालाय नमः' इति गन्धम् । 'कलविकरणाय नमः' इत्यक्षतान् । 'बलविकरणाय नमः' इति पुष्पम् । बलप्रमथनाय नमः' इति धूपम् । 'सर्वभूतदमनाय नमः' इति दीपम् । 'मनोन्मनाय नमः' इति नैवेद्यं ददाति । अथास्मा अष्टभिर्मन्त्रैरष्टौ पुष्पाणि ददाति 'भवाय देवाय नमः' इति अथास्य रुद्रतनूरुपतिष्ठते 'अघोरेभ्योऽथ घोरेभ्यः इति । अथ रुद्रगायत्रीं जपेत्–'तत्पुरुषाय विद्महे' इति शतकृत्वोऽपरिमितकृत्वो वा दशवारं वा । अथैनमाशिषमाशास्ते ईशानः सर्वविद्यानामिति । अथास्य मूर्धनि कलशधारया संततमभिषिञ्चन् 'नमस्ते रुद्र मन्यव' इत्येकादशानुवाकाञ्जपेत् । 'सर्वो वै रुद्र इमा रुद्राये'ति द्वादशर्चमन्यांश्च रौद्रमन्त्राञ्जपेत् । जपानन्तरम् 'अग्नाविष्णू सजोषसे मा' इत्येकादशानुवाकानामेकैकमनुवाकं जपेत् । एतत्पापक्षयार्थी व्याधिमोचनार्थी श्रीकामः शान्तिकाम आरोग्यकामश्च कुर्यात् । एवं कुर्वन्नेतत्सर्वमाप्नोति, पायसादिमहाहविर्निवेदयति, अथ दक्षिणां ददाति, दश गा एकादश, तदभावे एकां गां दद्यादित्याह भगवान्बौधायनः ॥

इति रुद्रजपहोमार्चनाभिषेकविधिः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पञ्चरुद्रः ।

कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे । वोचेमशंतमंहृदे ॥ यथानोऽअदितिः करत्पश्वेनृभ्योयथागवे । यथातोकायरुद्रियम् ॥ यथानोमित्रोवरुणोयथारुद्रश्चिकेतति । यथाविश्वेसजोषसः ॥ गाथपतिंमेघपतिंरुद्रंजलाषभेषजम् । तच्छंयोः सुम्नमीमहे ॥ यःशुक्रऽइवसूर्योहिरण्यमिवरोचते । श्रेष्ठोदेवानांवसुः ॥

शंनःकरत्यर्वतेसुगंमेषायमेष्ये । नृभ्योनारिभ्योगवे ॥ अस्मेसोमश्रियमधिनिधेहिशतस्यनृणाम् । महिश्रवस्तुविनृम्णम् ॥ मानःसोमपरिबाधोमारातयोजुहुरन्त । आनऽइन्दोवाजेभज ॥ यास्तेप्रजाऽअमृतस्यपरस्मिन्धामन्नृतस्य । मूर्धानाभासोमवेनऽआभूषन्तीःसोमवेदः ॥

इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः । यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेऽअस्मिन्ननातुरम् ॥ मृळानोरुद्रोतनोमयस्कृधिक्षयद्वीरायनमसाविधे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ ६ ॥ मते । यच्छंचयोश्चमनुरायेजेपितातदश्यामतवरुद्रप्रणीतिषु ॥ अश्यामतेसुमतिं
देवयज्ययाक्षयद्वीरस्यतवरुद्रमीढ्वः ॥

सुम्नायन्निद्विशोऽअस्माकमाचरारिष्टवीराजुहवामतेहविः ॥ त्वेषंवयंरुद्रंयज्ञसा
धंवंकुंकविमवसेनिह्वयामहे । आरेऽअस्मद्दैव्यंहेळोऽअस्यतुसुमतिमिद्वयमस्यावृणी
महे ॥ दिवोवराहमरुषंकपर्दिनंत्वेषंरूपंनमसानिह्वयामहे । हस्तेबिभ्रद्भेषजावा
र्याणिशर्मवर्मच्छर्दिरस्मभ्यंयंसत् ॥

इदंपित्रेमरुतामुच्यतेवचः स्वादोःस्वादीयोरुद्रायवर्धनम् । रास्वाचनोऽअमृतमर्त
भोजनंत्मनेतोकायतनयायमृळ ॥ मानोमहान्तमुतमानोऽअर्भकंमानऽउक्षंतमुत
मानऽउक्षितम् । मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः ॥ मान
स्तोकेतनयेमानऽआयौमानोगोषुमानोऽअश्वेषुरीरिषः । वीरान्मानोरुद्रभामितो
वधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥ ॥ ६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपतेस्तोमान्पशुपाऽइवाकरंरास्वापितर्मरुतांसुम्नमस्मे । भद्राहितेसुमतिर्मृळयत्तमाथावयमवऽइत्तेवृणीमहे ॥ आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेऽअस्तु । मृळाचनोअधिचब्रूहिदेवाधाचनःशर्मयच्छद्विबर्हाः ॥ अवोचामनमोऽअस्माऽअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान् । तन्नोमित्रोवरुणोमामहन्तामदितिःसिंधुःपृथिवीऽउतद्यौः ॥

आतेपितर्मरुतांसुम्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः । अभिनोवीरोऽअर्वतिक्षमेतप्रजायेमहिरुद्रप्रजाभिः ॥ त्वादत्तेभीरुद्रशंतमेभिःशतंहिमाऽअशीयभेषजेभिः ॥ व्य१स्मद्द्वेषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः ॥ श्रेष्ठोजातस्यरुद्रश्रियासितवस्तमस्तवसांवज्रबाहो ॥

पर्षिणःपारमंहसःस्वस्तिविश्वाऽअभीतीरपसोयुयोधि ॥ मात्वारुद्रचुक्रुधामानमोभिर्मादुष्टुतीवृषभमासहूती । उन्नोवीराँऽअर्पयभेषजेभिर्भिषक्तमंत्वाभिषजां

पं० मुंशी ... जहांगीराबाद २०२२९८
पं० ... शास्त्री
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शृणोमि ॥ हवीमभिर्हवंते यो हविर्भिरवस्तोमेभीरुद्रंदिषीय । ऋदूदरः सुहवो मानोऽअस्यैबभ्रुः सुशिप्रोरीरधन्मनायै ॥

उन्मांममंदवृषभोमरुत्वान्त्वक्षीयसावयंसानाधमानम् । घृणीवच्छायामरपाऽअशीयाविवासेयंरुद्रस्यसुम्नम् ॥ क्व १ स्यतेरुद्रमृळयाकुर्हस्तोयोऽअस्तिभेषजोजलाषः । अपभर्तारपंसोदैव्यस्याभीनुमांवृषभचक्षमीथाः ॥ प्रवभ्रवेवृषभायश्वितीचेमहोमहींसुष्टुतिमीरयामि ॥

नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरुद्रस्यनाम ॥ स्थिरेभिरंगैः पुरुरूपउग्रोबभ्रुः शुक्रेभिः पिपिशेहिरण्यैः । ईशानादस्यभुवनस्यभूरेर्नवाऽउंयोषद्रुद्रादसुर्यम् । अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयजतंविश्वरूपम् । अर्हन्निदंदयसेविश्वमभ्वंनवाऽओजीयोरुद्रत्वदस्ति ॥ ॥ ७ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रम् । मृळाजरित्रेरुद्रस्तवानोऽन्यंतेऽ
अस्मन्निवपंतुसेनाः ॥ कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयंतम् । भूरेर्दा
तारंसत्पतिंगृणीषेस्तुतस्त्वंभेषजारास्यस्मे ॥

यावोभेषजामरुतःशुचीनियाशंतमावृषणोयामयोभु । यानिमनुरवृणीतापिता
नस्ताशंचयोश्चरुद्रस्यवश्मि ॥ परिणोहेतीरुद्रस्यवृज्याःपरित्वेषस्यदुर्मतिर्महीगात् ।
अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृळ ॥ एवाबभ्रोवृषभचेकितान
यथादेवनहृणीषेनहंसि । हवनश्रुन्नोरुद्रेहबोधिबृहद्वदेमविदथेसुवीराः ॥

सोमारुद्राधारयेथामसुर्यं१प्रवामिष्टयोरमश्नुवंतु । दमेदमेसप्तरत्नादधानाशंनो
भूतंद्विपदेशंचतुष्पदे ॥ सोमारुद्राविवृहतंविषूचीममीवायानोगयमाविवेश ।
आरेबाधेथांनिर्ऋतिंपराचैरस्मेभद्रासौश्रवसानिसंतु ॥ सोमारुद्रायुवमेतान्यस्मे
विश्वातनूषुभेषजानिधत्तम् । अवस्यतंमुंचतंयन्नोऽअस्तितनूषुबद्धंकृतमेनोऽअ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्मत् ॥ तिग्मायुधौतिग्महेतीसुशेवौसोमारुद्राविहसुमृळतंनः । प्रनोमुंचतंवरुणस्य
पाशाद्गोपायतंनःसुमनस्यमाना ॥

इमारुद्रायस्थिरधन्वनेगिरःक्षिप्रेषवेदेवायस्वधाम्ने । अषाळायसहमानायवेधसे
तिग्मायुधायभरताशृणोतुनः ॥ सहिक्षयेणक्षम्यस्यजन्मनःसाम्राज्येनदिव्यस्य
चेतति । अवन्नवंतीरुपनोदुरश्चराऽनमीवोरुद्रजासुनोभव ॥

यातेदिद्युदवसृष्टादिवस्परिक्ष्मयाचरतिपरिसावृणक्तुनः । सहस्रंतेस्वपिवात
भेषजामानस्तोकेषुतनयेषुरीरिषः ॥ मानोवधीरुद्रमापरादामातेभूमप्रसितौही
ळितस्य । आनोभजबर्हिषिजीवशंसेयूयंपातस्वस्तिभिःसदानः ॥

अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः । यःशंसतेस्तुवतेधायिपज्रऽ
इंद्रज्येष्ठाऽअस्माँऽअवंतुदेवाः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वमग्नेरुद्रोऽअसुरोमहोदिवस्त्वंशर्धोमारुतंपृक्षऽईशिषे । त्वंवातैररुणैर्यासि शंगयस्त्वंपूषाविधतःपासिनुत्मना ॥

आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः । अग्निंपुरातनयित्नोरचित्ता द्धिरण्यरूपमवसेकृणुध्वम् ॥

भुवनस्यपितरंगीर्भिराभीरुद्रंदिवावर्धयारुद्रमक्तौ । बृहन्तऽमृष्वमजरंसुषुम्न मृधग्घुवेमकविनेषितासः ॥

तमुष्टुहियःस्विषुःसुधन्वायोविश्वस्यक्षयतिभेषजस्य । यक्ष्वामहेसौमनसायरुद्रं नमोभिर्देवमसुरंदुवस्य ॥ अयंमेहस्तोभगवानयंमेभगवत्तरः । अयंमेविश्वभेषजोयं शिवाभिमर्शनः ॥

त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनम् । उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमा
रुद्रा० ३ मृतात् ॥

पं० प्रेम दत्त शास्त्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी । अष्टापदीनवपदीब भूवुषीसहस्राक्षरापरमेव्योमन् ॥

ऋचोऽअक्षरेपरमेव्योमन्यस्मिन्देवाऽअधिविश्वेनिषेदुः । यस्तन्नवेदकिमृचा करिष्यतियइत्तद्विदुस्तऽइमेसमासते ॥

॥ इति पञ्चरुद्रः सम्पूर्णः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीगणेशाय नमः ॥ अस्य श्रीरुद्रस्य प्रश्नस्य ॥ अनुष्टुप्
छन्दः ॥ अघोर ऋषिः ॥ संकर्षणमूर्तिस्वरूपो योऽसावा-
दित्यः परमपुरुषः स एष रुद्रो देवता ॥ अग्निक्रतुचरमा-
यामिष्टिकायां शतरुद्रीयजपे विनियोगः ॥ सकलस्य रुद्रा-
ध्यायस्य श्रीरुद्रो देवता ॥ एका गायत्री च्छन्दः ॥ तिस्रोऽ-
नुष्टुभस्तिस्रः पङ्क्तयः ॥ सप्तानुष्टुभो द्वे जगत्यौ ॥ परमेष्ठी
ऋषिः ॥ अग्नाविष्णू सजोषसेत्येकादशानामनुवाकानाम् ॥
अग्निः काण्डऋषिः ॥ आद्या गायत्री ॥ आग्ना वैष्णवी ॥
शिष्टं यजुः ॥ वाजादयोऽग्नादिविशेषा देवताः ॥ महाविराट्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छन्दः ॥ ॐनमः शम्भव इति बीजम् ॥ मयो भव इति शक्तिः ॥ नमः शङ्करायेति बीजम् ॥ मयस्करायेति शक्तिः ॥ नमः शिवायेति बीजम् ॥ शिवतरायेति शक्तिः ॥ ॐकारो बीजम् ॥ माया शक्तिः ॥ ब्रह्मा बीजम् ॥ सुषुम्ना शक्तिः ॥ नम इषुकृद्भ्यो धन्वकृद्भ्य इति कीलकम् ॥ अस्तु० प्री० अभिषेके जपे वा विनियोगः ॥ हरिः ॐ ॥ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शꣳसिषद्विश्वेदेवाः सूक्तवाचः पृथिवि मातर्मा मा हिꣳसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्योवाचमुद्यासꣳ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुश्रूषेण्यां मनुष्येभ्यस्तं मां देवा अवंतु शोभायै पितरोऽनुमदंतु ॥ ॐ शांतिः शांतिः शांतिः ॥ ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ १ ॥ या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय ॥ २ ॥ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया गिरिशन्ताऽभिचाकशीहि ॥ ३ ॥ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥ ४ ॥ शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।

पं॰ प्रेम ... शास्त्री
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥ ५ ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीꣳश्च
सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥ ६ ॥ असौ यस्ताम्रो
अरुण उत बभ्रुः सुमङ्गलः । ये चेमाꣳ रुद्रा अभितो दिक्षु
श्रिताः सहस्रशोवैषाꣳ हेड ईमहे ॥ ७ ॥ असौ योऽव-
सर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्रन्नदृश्रन्नु-
दहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ॥ ८ ॥
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य
सत्वानोऽहं तेभ्योऽकरं नमः ॥ ९ ॥ प्रमुञ्च धन्वनस्त्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो
वप ॥ १० ॥ अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥ ११ ॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत । अनेशन्न-
स्येषव आभुरस्य निषङ्गधिः ॥ १२ ॥ या ते हेतिर्मीढुष्टम हस्ते
बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज
॥ १३ ॥ नमस्ते अस्त्वायुधायानातताय धृष्णवे । उभाभ्या-
मुत ते नमो बाहुभ्यां तव धन्वने ॥ १४ ॥ परि ते धन्वनो
हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्नि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धेहि तम् ॥१५॥ [*॥ १ ॥*] नमो हिरण्यबाहवे सेनान्यै दिशां
च पतये नमो ॥ १ ॥ नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां-
पतये नमो ॥ २ ॥ नमः सस्पिञ्जराय त्विषीमते पथीनां-
पतये नमो ॥ ३ ॥ नमो बभ्लुशाय विव्याधिनेऽन्नानां
पतये नमो ॥ ४ ॥ नमो हरिकेशायोपवीतिने पुष्टानां पतये
नमो ॥ ५ ॥ नमो भवस्य हेत्यै जगतां पतये नमो ॥ ६ ॥
नमो रुद्रायाततताविने क्षेत्राणां पतये नमो ॥ ७ ॥ नमः
सूतायाहन्त्याय वनानां पतये नमो ॥ ८ ॥ नमो रोहिताय
स्थपतये वृक्षाणां पतये नमो ॥ ९ ॥ नमो मन्त्रिणे वाणि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
जाय कक्षाणां पतये नमो ॥ १० ॥ नमो भुवन्तये वारि-
वस्कृतायौषधीनां पतये नमो ॥ ११ ॥ नम उच्चैर्घोषायाक्र-
न्दयते पत्तीनां पतये नमो ॥ १२ ॥ नमः कृत्स्नवीताय
धावते सत्वनां पतये नमः ॥ १३ ॥ [*॥ २ ॥*] नमः सह-
मानाय निव्याधिनं आ व्याधिनीनां पतये नमो ॥ १ ॥
नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो ॥ २ ॥ नमो
निषङ्गिण इषुधिमते तस्कराणां पतये नमो ॥ ३ ॥ नमो
वञ्चते परिवञ्चते स्तायूनां पतये नमो ॥ ४ ॥ नमो निचेरवे
रुद्रा० ४ परिचरायारण्यानां पतये नमो ॥ ५ ॥ नमः सृकाविभ्यो

पं० प्रेम दत्त शास्त्री
Kirtikant Sharma Collection, Najafgarh
[illegible] २३६४

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जिघाꣳसद्भ्यो मुष्णतां पतये नमो ॥ ६ ॥ नमोऽसिमद्भ्यो
नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो ॥ ७ ॥ नम उष्णीषिणे
गिरिचराय कुलुञ्चानां पतये नमो ॥ ८ ॥ नम इषुमद्भ्यो
धन्वाविभ्यश्च वो नमो ॥ ९ ॥ नम आतन्वानेभ्यः प्रति-
दधानेभ्यश्च वो नमो ॥ १० ॥ नम आयच्छद्भ्यो विसृजद्भ्यश्च
वो नमो ॥ ११ ॥ नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो
॥ १२ ॥ नम आसीनेभ्यः शयानेभ्यश्च वो नमो ॥ १३ ॥ ॥ १३ ॥
नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो ॥ १४ ॥ नमस्तिष्ठद्भ्यो
धावद्भ्यश्च वो नमो ॥ १५ ॥ नमः सभाभ्यः सभापतिभ्यश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वो नमो ॥ १६ ॥ नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः
॥१७॥ [*॥ ३॥*] नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो
नमो ॥ १ ॥ नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो ॥ २॥
नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो ॥ ३ ॥ नमो व्रातेभ्यो
व्रातपतिभ्यश्च वो नमो ॥ ४ ॥ नमो गणेभ्यो गणपति-
भ्यश्च वो नमो ॥ ५ ॥ नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो
नमो ॥ ६ ॥ नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो ॥ ७ ॥
नमो रथिभ्योऽरथेभ्यश्च वो नमो ॥ ८ ॥ नमो रथेभ्यो रथ-
पतिभ्यश्च वो नमो ॥ ९ ॥ नमः सेनाभ्यः सेनानिभ्यश्च वो

पं० प्रेम दत्त शास्त्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमो ॥ १० ॥ नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो ॥११॥
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो ॥ १२ ॥ नमः कुला-
लेभ्यः कर्मारेभ्यश्च वो नमो ॥ १३ ॥ नमः पुञ्जिष्टेभ्यो
निषादेभ्यश्च वो नमो ॥ १४ ॥ नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो
नमो ॥ १५ ॥ नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो ॥ १६ ॥
नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥ १७ ॥ [*॥४॥*] नमो
भवाय च रुद्राय च ॥ १ ॥ नमः शर्वाय च पशुपतये च
॥ २ ॥ नमो नीलग्रीवाय च शितिकण्ठाय च ॥ ३ ॥ नमः
कपर्दिने च व्युप्तकेशाय च ॥ ४ ॥ नमः सहस्राक्षाय च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शतधन्वने च ॥ ५ ॥ नमो गिरिशाय च शिपिविष्टाय च ॥ ६ ॥
नमो मीढुष्टमाय चेषुमते च ॥ ७ ॥ नमो ह्रस्वाय च वाम-
नाय च ॥ ८ ॥ नमो बृहते च वर्षीयसे च ॥ ९ ॥ नमो
वृद्धाय च संवृध्वने च ॥ १० ॥ नमो अग्रियाय च प्रथमाय
च ॥ ११ ॥ नम आशवे चाजिराय च ॥ १२ ॥ नमः
शीघ्रियाय च शीभ्याय च ॥ १३ ॥ नम ऊर्म्याय चावस्व-
न्याय च ॥ १४ ॥ नमः स्रोतस्याय च द्वीप्याय च ॥ १५ ॥
[*॥५॥*] नमो ज्येष्ठाय च कनिष्ठाय च ॥ १ ॥ नमः पूर्वजाय
चापरजाय च ॥ २ ॥ नमो मध्यमाय चापगल्भाय च ॥ ३ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमो जघन्याय च बुध्नियाय च ॥ ४ ॥ नमः सोभ्याय च प्रतिसर्याय च ॥ ५ ॥ नमो याम्याय च क्षेम्याय च ॥ ६ ॥ नमः उर्वर्याय च खल्याय च ॥ ७ ॥ नमः श्लोक्याय चावसान्याय च ॥ ८ ॥ नमो वन्याय च कक्ष्याय च ॥ ९ ॥ नमः श्रवाय च प्रतिश्रवाय च ॥ १० ॥ नमः आशुषेणाय चाशुरथाय च ॥ ११ ॥ नमः शूराय चावभिन्दते च ॥ १२ ॥ नमो वर्मिणे च वरूथिने च ॥ १३ ॥ नमो बिल्मिने च कवचिने च ॥ १४ ॥ नमः श्रुताय च श्रुतसेनाय च ॥ १५ ॥ ॥ १५ ॥

[*॥ ६ ॥*] नमो दुन्दुभ्याय चाहनन्याय च ॥ १ ॥ नमो धृष्णवे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च प्रमृशायं च ॥ २ ॥ नमो दूताय च प्रहिताय च ॥ ३ ॥
नमो निषङ्गिणे चेषुधिमते च ॥ ४ ॥ नमस्तीक्ष्णेषवे चायु-
धिने च ॥ ५ ॥ नमः स्वायुधाय च सुधन्वने च ॥ ६ ॥ नमः
स्रुत्याय च पथ्याय च ॥ ७ ॥ नमः काट्याय च नीप्याय
च ॥ ८ ॥ नमः सूद्याय च सरस्याय च ॥ ९ ॥ नमो नाद्याय
च वैशन्ताय च ॥ १० ॥ नमः कूप्याय चावट्याय च ॥ ११ ॥
नमो वर्ष्याय चावर्ष्याय च ॥ १२ ॥ नमो मेघ्याय च
विद्युत्याय च ॥ १३ ॥ नम ईध्रियाय चातप्याय च ॥ १४ ॥
नमो वात्याय च रेष्मियाय च ॥ १५ ॥ नमो वास्तव्याय च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

 वास्तुपाय च ॥ १६ ॥ [*॥ ७॥*] नमः सोमाय च रुद्राय च
॥ १ ॥ नमस्ताम्राय चारुणाय च ॥ २ ॥ नमः शङ्गाय च
पशुपतये च ॥ ३ ॥ नम उग्राय च भीमाय च ॥ ४ ॥ नमो
अग्रेवधाय च दूरेवधाय च ॥ ५ ॥ नमो हन्त्रे च हनीयसे
च ॥ ६ ॥ नमो वृक्षेभ्यो हरिकेशेभ्यो ॥ ७ ॥ नमस्ताराय
॥ ८ ॥ नमः शम्भवे च मयोभवे च ॥ ९ ॥ नमः शङ्कराय
च मयस्कराय च ॥ १० ॥ नमः शिवाय च शिवतराय च
॥ ११ ॥ नमस्तीर्थ्याय च कूल्याय च ॥ १२ ॥ नमः पार्याय
चावार्याय च ॥ १३ ॥ नमः प्रतरणाय चोत्तरणाय च ॥ १४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नम॑ आता॒र्या॑य चाला॒द्या॑य च॒ ॥ १५ ॥ नम॒ः शष्प्या॑य च॒
फेन्या॑य च॒ ॥ १६ ॥ नम॑ः सिक॒त्या॑य च प्रवा॒ह्या॑य च ॥ १७ ॥
[*॥ ८ ॥*] नम॑ इरि॒ण्या॑य च प्रप॒थ्या॑य च॒ ॥ १ ॥ नम॑ः किँ॒-
शि॒लाय॑ च॒ क्षय॑णाय च॒ ॥ २ ॥ नम॑ः कप॒र्दिने॑ च पुल॒स्तये॑ च॒
॥ ३ ॥ नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒ ॥ ४ ॥ नम॒स्तल्प्या॑य
च॒ गेह्या॑य च॒ ॥ ५ ॥ नम॑ः का॒ट्या॑य च गह्वरे॒ष्ठाय॑ च॒ ॥ ६ ॥
नमो॑ ह्रद॒य्या॑य च निवे॒ष्प्या॑य च॒ ॥ ७ ॥ नम॑ः पाँ॒सव्या॑य
च रज॒स्या॑य च॒ ॥ ८ ॥ नम॒ः शुष्क्या॑य च हरि॒त्या॑य च॒ ॥ ९ ॥
रुद्रा० ५ नमो॒ लोप्या॑य चोल॒प्या॑य च॒ ॥ १० ॥ नम॑ ऊ॒र्व्या॑य च

पं० प्रेम ... शास्त्री
जहांगीराबाद २ २३८४
बुलन्दशहर (...)
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूर्म्याय च ॥ ११ ॥ नमः पर्ण्याय च पर्णशद्याय च ॥ १२ ॥
नमोऽपगुरमाणाय चाभिघ्नते च ॥ १३ ॥ नम आक्खिदते
च प्रक्खिदते च ॥ १४ ॥ नमो वः किरिकेभ्यो देवानाꣳ
हृदयेभ्यो ॥ १५ ॥ नमो विक्षीणकेभ्यो ॥ १६ ॥ नमो
विचिन्वत्केभ्यो ॥ १७ ॥ नम आनिर्हतेभ्यो ॥ १८ ॥ नम
आमीवत्केभ्यः ॥१९॥ [*॥ ९ ॥*] द्रापे अन्धसस्पते दरिद्रन्नी-
ललोहित । एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां
किंचनाममत् ॥ १ ॥ या ते रुद्र शिवा तनूः शिवा विश्वाह-
भेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥ २ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् । यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ ३ ॥ मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥ ४ ॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥ ५ ॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विधेम ते ॥ ६ ॥ आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय
सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च
नः शर्म यच्छ द्विबर्हाः ॥ ७ ॥ स्तुहि श्रुतं गर्तसदं युवानं
मृगं न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो अन्यं
ते अस्मन्निवपन्तु सेनाः ॥ ८ ॥ परि णो रुद्रस्य हेतिर्वृणक्तु
परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृडय ॥ ९ ॥ मीढुष्टम शिवतम शिवो
नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान
आचर पिनाकं बिभ्रदागहि ॥ १० ॥ विकिरिद विलोहित

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमस्ते अस्तु भगवः । यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्निवं-
पन्तु ताः ॥ ११ ॥ सहस्राणि सहस्रधा बाहुवोस्तवं हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥ १२ ॥
[*॥ १० ॥*] सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १ ॥ अस्मिन्मं-
हत्यर्णवेऽन्तरिक्षे भवा अधि ॥ २ ॥ नीलग्रीवाः शितिकण्ठाः
शर्वा अधः क्षमाचराः ॥ ३ ॥ नीलग्रीवाः शितिकण्ठा दिवꣳ
रुद्रा उपश्रिताः ॥ ४ ॥ ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा
विलोहिताः ॥ ५ ॥ ये भूतानामधिपतयो विशिखासः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कपर्दिनः ॥ ६ ॥ ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो
जनान् ॥ ७ ॥ ये पथां पथिरक्षय ऐलबृदा यव्युधः ॥ ८ ॥
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥ ९ ॥
य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ॥
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १० ॥ नमो
रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो
वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशो-
दीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो ॥ १९ ॥
यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥ ११ ॥ [*॥ ११ ॥*]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ अग्नाविष्णू सजोषसे मा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतम् । वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मेचक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च मे ॥ १ ॥ ज्यैष्ठ्यं च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च
मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च
मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे
सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे
त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्य-
माणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च
मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं
च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च ॥ २० ॥
मे ॥२॥ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ ३ ॥ ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु
॥ २१ ॥ च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूय-
वाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे
तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे
प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥ ४ ॥
अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च
मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च
मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च ॥ २१ ॥
म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च
मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च
मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ ९ ॥
अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म
इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे
बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म
इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे
विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म
इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ २२ ॥ मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च
मे इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च
मे ॥ ६ ॥ अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म
उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च
म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म
आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतु-
ग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरु-
त्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे ॥ २२ ॥
सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मे ॥ ७ ॥ इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे
स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च
मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च
म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च
मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगा-
कारश्च मे ॥८॥ अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च
मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे
शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे
स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥९॥
गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे
दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा
च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाच्च मे पष्ठौही च म
उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वान्च मे धेनुश्च
म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन
कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताᳬ श्रोत्रं
यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा
यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ १० ॥ एका च मे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे
त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च मे
एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे
सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रय-
स्त्रिꣳशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च
मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे
द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्च-
त्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च
क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भुवनश्चाधिपतिश्च ॥ ११ ॥ इडा देवहूर्मनु० ॥ सह नाव-
वतु ॥ सह नौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्विनाव-
धितमस्तु मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ॥
यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥

इति रुद्राध्यायः समाप्तः ॥

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ० प्र०)

॥ श्रीसांबसदाशिवार्पणमस्तु ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शकाब्दाः १८९७, सनाब्दाः १९७५

मुद्रक :-
लक्ष्मीबाई नारायण चौधरी,
निर्णयसागर प्रेस, ४५ डीई ऑफ टोकरसी
जीवराज रोड, शिवडी, मुंबई १५

प्रकाशक :-
निर्णयसागर प्रकाशन
२६–२८ डॉ. एम्. वी. वेलकर स्ट्रीट,
मुंबई २

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति नमक-चमकात्मको

रुद्राध्यायः

मूल्य रु. ३

Kirtikant Sharma Collection, Najafgarh